श्री हर्यष्टकं

श्री हर्यष्टकं

हरिर्हरति पापानि दुष्टचित्तैरपि स्मृतः |
अनिच्छयाऽपि संस्पृष्टो दहत्येव हि पावकः || 1 ||

स गंगा स गया सेतुः स काशी स च पुष्करं |
जिह्वाग्रे वर्तते यस्य हरिरित्यक्षरद्वयं || 2 ||

वाराणस्यां कुरुक्षेत्रे नैमिशारण्य एव च |
यत्कृतं तेन येनोक्तं हरिरित्यक्षरद्वयं || 3 ||

पृथिव्यां यानि तीर्थानि पुण्यान्यायतनानि च |
तानि सर्वाण्यशेषाणि हरिरित्यक्षरद्वयं || 4 ||

गवां कोटिसहस्राणि हेमकन्यासहस्रकं |
दत्तं स्यात्तेन येनोक्तं हरिरित्यक्षरद्वयं || 5 ||

ऋग्वेदोऽथ यजुर्वेदः सामवेदोऽप्यथर्वणः |
अधीतस्तेन येनोक्तं हरिरित्यक्षरद्वयं || 6 ||

अश्वमेधैर्महायज्ञैर्नरमेधैस्तथैव च |
इष्टं स्यात्तेन येनोक्तं हरिरित्यक्षरद्वयं || 7 ||

प्राणः प्रयाण पाथेयं संसारव्याधिनाशनं |
दुःखात्यंत परित्राणं हरिरित्यक्षरद्वयं || 8 ||

बद्धः परिकरस्तेन मोक्षाय गमनं प्रति |
सकृदुच्चारितं येन हरिरित्यक्षरद्वयं || 9 ||

हर्यष्टकमिदं पुण्यं प्रातरुत्थाय यः पठेत् |
आयुष्यं बलमारोग्यं यशो वृद्धिः श्रियावहं || 10 ||

प्रह्लादेन कृतं स्तोत्रं दुःखसागरशोषणं |
यः पठेत्स नरो याति तद्विष्णोः परमं पदं || 11 ||

इति प्रह्लादकृत श्री हर्यष्टकं |